শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৭২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭২

*অক্রূরাগমনৱর্ণনম্*

কংসোথ নারদগিরা ব্রজৱাসিনং ত্বা-
মাকর্ণ্য দীর্ণহৃদযঃ স হি গান্দিনেযম্।
আহূয কার্মুকমখচ্ছলতো ভৱন্ত-
মানেতুমেনমহিনোদহিনাথশাযিন্॥ ১ ॥

অক্রূর এষ ভৱদঙঘ্রিপরশ্চিরায
ত্বদ্দর্শনাক্ষমমনাঃ ক্ষিতিপালভীত্যা।
তস্যাজ্ঞযৈৱ পুনরীক্ষিতুমুদ্যতস্ত্ৱা-
মানন্দভারমতিভূরিতরং বভার॥ ২ ॥

সোযং রথেন সুকৃতী ভৱতো নিৱাসং
গচ্ছন্ মনোরথগণাংস্ত্ৱযি ধার্যমাণান্।
আস্ৱাদযন্ মুহুরপাযভযেন দৈৱং
সম্প্রার্থযন্ পথি ন কিঞ্চিদপি ৱ্যজানাত্॥ ৩ ॥

দ্রক্ষ্যামি ৱেদশতগীতগতিং পুমাংসং
স্প্রক্ষ্যামি কিংস্ৱিদপি নাম পরিষ্ৱজেযম্।
কিং ৱক্ষ্যতে স খলু মাং ক্ৱনু ৱীক্ষিতঃ স্যা-
দিত্থং নিনায স ভৱন্মযমেৱ মার্গম্॥ ৪ ॥

ভূযঃ ক্রমাদভিৱিশন্ ভৱদঙঘ্রিপূতং
ৱৃন্দাৱনং হরৱিরিঞ্চসুরাভিৱন্দ্যম্।
আনন্দমগ্ন ইৱ লগ্ন ইৱ প্রমোহে
কিং কিং দশান্তরমৱাপ ন পঙ্কজাক্ষ॥ ৫ ॥

www.prapatti.com

পশ্যন্নৱন্দত ভৱদ্বিহৃতিস্থলানি
পাংসুষৱেষ্টত ভৱচ্চরণাঙ্কিতেষু।
কিং ব্রূমহে বহুজনা হি তদাপি জাতা
এৱং তু ভক্তিতরলা ৱিরলাঃ পরাত্মন্॥ ৬ ॥

সাযং স গোপভৱনানি ভৱচ্চরিত্র-
গীতামৃতপ্রসৃতকর্ণরসাযনানি।
পশ্যন্ প্রমোদসরিদেৱ কিলোহ্যমানো
গচ্ছন্ ভৱদ্ভৱনসন্নিধিমন্ৱযাসীত্॥ ৭ ॥

তাৱদ্দদর্শ পশুদোহৱিলোকলোলং
ভক্তোত্তমাগতিমিৱ প্রতিপালযন্তম্।
ভূমন্ ভৱন্তমযমগ্রজৱন্তমন্ত-
র্ব্রহ্মানুভূতিরসসিন্ধুমিৱোদ্ৱমন্তম্॥ ৮ ॥

সাযন্তনাপ্লৱৱিশেষৱিৱিক্তগাত্রৌ
দ্ৱৌ পীতনীলরুচিরাম্বরলোভনীযৌ।
নাতিপ্রপঞ্চধৃতভূষণচারুৱেষৌ
মন্দস্মিতর্দ্রৱদনৌ স যুৱাং দদর্শ॥ ৯ ॥

দূরাদ্রথাতসমৱরুহ্য নমন্তমেন-
মুত্থাপ্য ভক্তকুলমৌলিমথোপগূহন্।
হর্ষান্মিতাক্ষরগিরা কুশলানুযোগী
পাণিং প্রগৃহ্য সবলোথ গৃহং নিনেথ॥ ১০ ॥

নন্দেন সাকমমিতাদরমর্চযিত্ৱা
তং যাদৱং তদুদিতাং নিশময্য ৱার্তাম্।
গোপেষু ভূপতিনিদেশকথাং নিৱেদ্য
নানাকথাভিরিহ তেন নিশামনৈষীঃ॥ ১১ ॥

চন্দ্রাগৃহে কিমুত চন্দ্রভগাগৃহে নু
রাধাগৃহে নু ভৱনে কিমু মৈত্রৱিন্দে।
ধূর্তো ৱিলম্বত ইতি প্রমদাভিরুচ্চৈ-
রাশঙ্কিতো নিশি মরুতপুরনাথ পাযাঃ॥ ১২ ॥

www.prapatti.com

⋆⋆⋆⋆⋆⋆⋆⋆⋆⋆

www.prapatti.com